धर्मोद्रौणिस्तथेतरोलंनहितुं ॥ नोराङ्कर्णोब्रह्मवरीयेनध्वस्तोस्त्रमग्रहीत्सब्रह्मवरी ॥४८॥ क्षात्रंधर्मंस्ववतागुरु
वृत्त्यैकेशवाज्ञयाचरमंस्ववता ॥ सर्वंसेहेमनसाभीमेनेशैकमानिनाहेमनसा ॥४९॥ यद्भक्तप्रवरेणप्रोतःस्वस्मि
न्सकीचकःप्रवरेण ॥ पतितास्तस्यसहायाःकृष्णार्थेमानिनःसमस्यसहायाः ॥५०॥ यद्भक्त्यानुगृहीतौपार्थौ
भीमश्चगोनृपौनुगृहीतौ॥ऋणमुक्त्यैसुव्यत्यस्त्यैक्रमशोवीरावमुंचतांसुव्यत्यस्त्यै ॥५१॥ यद्भक्त्यामितयालंकृ
ष्णाकार्येविवेशकृष्णाकार्ये ॥ यामीरार्धतनुत्वान्नापाद्धीमादृतेपिनापाद्धीमात् ॥५२॥ यांस्प्रष्टुमिच्छंतमजा
तशत्रुंन्यवारयत्स्वस्थमजातशत्रुं ॥ शंरूपानेनित्यरतेरियंश्रीरितिस्मदेवेज्यदितेरियंश्रीः ॥५३॥ मनसामन
सामनसामनसायमनंतमजस्रमवेदनुया ॥ विलयंविलयंविलयंविलयन्निखिलंत्वशुभंप्रचकारचयः ॥५४॥
सोगाहूतमुखेनप्रभुणेदंवर्ततेयदूतमुखेन॥पार्थार्थैबहुतनुतांयत्रप्रकाशयत्स्वयंसबहुतनुतां॥५५॥गुरुकर्णन
दीजादीनवधीच्चक्षुर्बलेनजनदीजादीन् ॥ शक्त्यानिजयापरवान्स्वजनानुद्रेचयन्ननंतयापरवान्॥५६॥यस्य ॥७४९॥
सुनीतिसहायान्नरिपून्मेनेर्जुनःसमेतसहायान् ॥ अकरोच्चासुपरासुप्रतातिंसेनासुधावनासुपरासु ॥५७॥ ये
नजयद्रथमारःपार्थःशत्रूनवापतद्रथमारः ॥ यद्विरहादपिदेहेसरथःशश्वत्स्थितेःसदादपिदेहे ॥५८॥ यद्गरि

तोभरताभःप्रभुरंभाभावितोभिभरताभः ॥ भीमोरभसाभिभवीप्रसभंभाभाभिभूभंसाभिभवी ॥५९॥ यदनु
ग्रहिपूर्णत्वाद्भीमःसर्वानरीननहिपूर्णत्वात्॥अदहद्बाहुबलेनक्रोधाग्नावाहितान्निजाहुबलेन॥६०॥कृष्णाभी
मासतमःशीर्णयेनस्वकीयहृदयमासतमः॥धृतराष्ट्रसुतानवधीद्भीमेनस्थापितोमनसिसुसुतानवधीत् ॥६१॥
भीमविपाटितदेहानदर्शयत्स्वानरीन्विपाटितदेहान् ॥ कृष्णायाहितकारीसम्यगीरप्रियःसदाहितकारी
॥ ६२ ॥ अथहरिणापीतबलंद्रौणेरस्त्रंमहारिणापीतबलं ॥ दधतावासोमरणंनीतंचक्रेभिमन्युजंसोमरणं
॥६३॥ तस्यचरक्षासुकृताजनार्दनेनेशशेषकेक्षासुकृता॥पार्थेषुप्रेमवतानित्यंभर्त्रासुतासुविप्रेमवता ॥६४॥
ज्ञानंपरमंप्रादाद्भीष्मगतःसृतिविमोक्षचरमंप्रादात् ॥पांडुसुतानामधिकंचक्रेवेदंगुणोत्तरंस्वनामधिकं॥६५॥
तेनावापिसुजातैर्हयमेधस्तुरगवर्तनेपिसुजातैः ॥ पांडुसुतैःसवसूकैःप्रासैर्व्यासात्मनासुसवसूकैः ॥६६॥ तद
नुसुपांडुतनूजैरेमेक्ष्मांपालयन्सुपांडुतनूजैः ॥ अनुपमसुखरूपोजःपरमःश्रीवल्लभःसतिखरूपोजः॥६७॥ सु
गतिंचरमामददान्निजयोग्यांज्ञानिसुतातिंपरमामददात् ॥ पार्थानांसयदूनांसपितृप्रेष्यादिनामिनांसयदूनां
॥६८॥ रेमेतत्रापिसुखीपरमोनंतोननंदतत्रापिसुखी॥ प्राणेनेंदिरयाचप्रयुतोनित्यंमहागुणेंदिरयाच ॥६९॥

 

एवंसर्वाणिहरेरूपाणिश्रीपतेःसुपर्वाणिहरेः॥पूर्णसुखानिसुभातिप्रततानिनिरंतराणिसुभांति॥७०॥रामरा-
म महाबाहोमायातेसुदुरासदा॥वादसाददकोलोकेपादावेवतवासजेत्॥७१॥जेत्सवातववेदापाकेलोकोदद
सादव ॥ दासरादुसुतेयामाहोबाहाममरामराः॥७२॥ देवानांपतयोनित्यंमतंयस्यनजानते ॥ तस्मैदेवन
मस्येहंभवतेऽसुरमारये॥७३॥ समस्तदेवजनकवासुदेवपरामृत॥ वासुदेवपरामृतज्ञानमूर्तेनमोस्तुते॥७४॥
देवादेदेवलोकपपूर्णानंदमहोदधे॥ सर्वज्ञेशरमानाथदेवादेदेवलोकप॥७५॥ योनिर्ममेशेषपुराणविद्यांयोनि
र्ममेशेषपुराणविद्यां॥ योनिर्ममेशेषपुराणविद्यांयोनिर्ममेशेषपुराणविद्यां ॥७६॥ अनंतपारामितविक्रमेशप्र
भोरमापारमनंतपार॥महागुणाढ्यापरिमेयसत्वरमालयाशेषमहागुणाढ्य॥७७॥भाभाभाभाभाभाभाभाभा
भाभाभाभाभा॥ भाभाभाभाभाभाभाभाभाभाभाभाभाभा॥७८॥ नैवपरःकेशवतःपरमादस्मात्समश्चसुके
शवतः॥ सोयंशपथवरोनः शश्वत्संधारितःसुशपथवरोनः॥७९॥कृष्णकथेयंयमितासुखतीर्थेनोदितानेनेयं
यमिता॥भक्तिमतापरमेशेसर्वोद्रेकात्सदानुतापरमेशे॥८०॥इतिनारायणनामासुखतीर्थसुपूजितःसुरायण ॥७५०॥
नामा॥पूर्णगुणैरधिकज्ञानेच्छाभक्तिभिःस्वधिकपूर्ण॥८१॥ इतिश्रीमदानंदतीर्थभगवत्पा०यमकभारतंसं०